सहायक आचार्य प्रतियोगी परीक्षा - 2024 (संस्कृत शिक्षा विभाग) परीक्षा तिथि - 19/09/2024

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16
पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

# PAS-24

इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.

प्रश्न–पुस्तिका संख्या व बारकोड/
Question Booklet No. & Barcode

414201

**Paper Code : 32**

**Sub : Yajurved-II**
**Paper-II**

**समय : 03 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03 Hours + 10 Minutes Extra***

**अधिकतम अंक : 75**
**Maximum Marks : 75**

प्रश्न–पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न-पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :
- प्रश्न–पुस्तिका संख्या तथा ओ.एम.आर. उत्तर–पत्रक पर अंकित बारकोड संख्या समान है ।
- प्रश्न–पुस्तिका एवं ओ.एम.आर. उत्तर–पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।

किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न–पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।**
2. सभी प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल नीले बॉल पॉइंट पेन से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
7. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।**
8. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें । यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।**

9.* **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।**

10. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पाँच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा ।**
11. मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022** तथा अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidate will themself be responsible for filling wrong Roll No.
6. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
7. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
8. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**

9.* **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**

10. **A candidate who has not darkened any of the five circles in more than 10% questions, shall be disqualified.**
11. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

**उत्तर–पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति । परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर–पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें । वीक्षक उत्तर–पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे । परीक्षार्थी को उत्तर–पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी ।**

1. "पुंसवनम्" कदा भवति ?
(1) प्रथमे द्वितीये वा ।
(2) द्वितीये तृतीये वा ।
(3) तृतीये चतुर्थे वा ।
(4) चतुर्थे पञ्चमे वा ।
(5) अनुत्तरितः प्रश्नः

2. सीमन्तोन्नयनम् कदा भवति ?
(1) मासे द्वितीये चतुर्थे वा ।
(2) तृतीये पञ्चमे वा ।
(3) षष्ठेऽष्टमे वा ।
(4) सप्तमे नवमे वा ।
(5) अनुत्तरितः प्रश्नः

3. अन्नप्राशनं कदा भवति ?
(1) द्वितीयेमासे
(2) तृतीयेमासे
(3) चतुर्थेमासे
(4) षष्ठेमासे
(5) अनुत्तरितः प्रश्नः

4. चूडाकरणम् कदा करणीयम् ?
(1) सांवत्सरिकस्य चूडाकरणम्, तृतीये वाऽप्रतिहते ।
(2) सांवत्सरिकस्य चूडाकरणम्, चतुर्थे वाऽप्रतिहते ।
(3) सांवत्सरिकस्य चूडाकरणम्, पञ्चमे वाऽप्रतिहते ।
(4) सांवत्सरिकस्य चूडाकरणम्, षष्ठे वाऽप्रतिहते ।
(5) अनुत्तरितः प्रश्नः

5. पाणिग्रहणोपरान्ते कन्या अश्मानम् केन अंगेन आरोहति ?
(1) दक्षिणहस्तेन (2) वामपादेन
(3) दक्षिणपादेन (4) वामहस्तेन
(5) अनुत्तरितः प्रश्नः

6. बहिःनिष्क्रमणं कस्मिन् मासे भवति ?
(1) तृतीये (2) चतुर्थे
(3) पञ्चमे (4) सप्तमे
(5) अनुत्तरितः प्रश्नः

7. ब्राह्मणबालकम् कस्मिन् ऋतौ उपनयेत् ?
(1) वसन्ते (2) ग्रीष्मे
(3) शरदि (4) वर्षाऋतौ
(5) अनुत्तरितः प्रश्नः

8. राजन्यस्य कृते उपनयने मन्त्रोपदेशे कस्य छन्दसः प्रयोगः भवति ?
(1) शक्वरी छन्दसः (2) त्रिष्टुभ् छन्दसः
(3) जगती छन्दसः (4) अनुष्टुप् छन्दसः
(5) अनुत्तरितः प्रश्नः

9. भिक्षाचर्यप्रसङ्गे ब्राह्मणबालकः किं ब्रवीति –
(1) भवति भिक्षां देहि ।
(2) भिक्षां भवति देहि ।
(3) भिक्षां देहि भवति ।
(4) आचार्य भिक्षां देहि ।
(5) अनुत्तरितः प्रश्नः

10. प्रतिवेदस्य अध्ययनस्य कृते कति वर्षाणि निश्चितानि ?
(1) नव नव वा प्रतिवेदम्
(2) एकादश एकादश वा प्रतिवेदम्
(3) द्वादश द्वादश वा प्रतिवेदम्
(4) त्रयोदश त्रयोदश वा प्रतिवेदम्
(5) अनुत्तरितः प्रश्नः

11. ब्राह्मणबालकस्य उपनयनं कदा करणीयम् ?
(1) सप्तवर्षे ब्राह्मणमुपनयेद् गर्भसप्तमे वा ।
(2) अष्टवर्षे ब्राह्मणमुपनयेद् गर्भसप्तमे वा ।
(3) अष्टवर्षे ब्राह्मणमुपनयेद् गर्भाष्टमे वा ।
(4) एकादशवर्षे ब्राह्मणमुपनयेद् गर्भाष्टमे वा ।
(5) अनुत्तरितः प्रश्नः

**12.** पारस्करगृह्यसूत्रानुसारेण तर्पणविधौ सर्वप्रथमं कस्याः देवतायाः तर्पणं भवति ?

(1) ब्रह्मणः (2) विष्णोः

(3) रुद्रस्य (4) प्रजापतेः

(5) अनुत्तरितः प्रश्नः

**13.** आभ्युदयिक-श्राद्धस्य समापने कस्य उच्चारणम् न भवति ?

(1) स्वाहा (2) स्वधा

(3) तृप्तम् (4) पितरः

(5) अनुत्तरितः प्रश्नः

**14.** 'द्वारयोर्द्वारशाखयोर्मध्ये द्वौ बली ददाति' तदा किम् पठति ?

(1) धात्रे नमः विधात्रे नमः ।

(2) धात्रे नमः विष्णवे नमः ।

(3) विधात्रे नमः विष्णवे नमः ।

(4) विधात्रे नमः प्रजापतये नमः ।

(5) अनुत्तरितः प्रश्नः

**15.** "नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत्" इति कस्य कृते नियमः ?

(1) आचार्यस्य (2) स्नातकस्य

(3) गृहस्थस्य (4) वरस्य

(5) अनुत्तरितः प्रश्नः

**16.** सप्तपदौ कन्यायाः प्रथमं पदं किं निमित्तं भवति ?

(1) बलाय (2) अन्नाय

(3) पश्वादिभ्यः (4) धनपुष्ट्यै

(5) अनुत्तरितः प्रश्नः

**17.** "इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनतीम आगात्" अनेन मन्त्रेण किं विधीयते ?

(1) दण्डग्रहणम्

(2) ब्रह्मसूत्रधारणम्

(3) मेखलाबन्धनम्

(4) तिलकधारणम्

(5) अनुत्तरितः प्रश्नः

**18.** श्रौत-कर्मस्वधिकारः कस्यास्ति ?

(1) ब्रह्मचारिणाम्

(2) आहिताग्नेः

(3) संन्यासिनाम्

(4) वानप्रस्थाश्रमिणाम्

(5) अनुत्तरितः प्रश्नः

**19.** "अथातोऽधिकारः" अत्र अथ शब्दस्य कोऽर्थः ?

(1) वेदाध्ययनानन्तरम्

(2) उपनयनानन्तरम्

(3) समावर्तनानन्तरम्

(4) वेदारम्भानन्तरम्

(5) अनुत्तरितः प्रश्नः

**20.** कर्मणां फलजनकत्वे साधिते तेषु केषामधिकारः अत्र कः सिद्धान्तपक्षः ?

(1) देवानाम्

(2) मनुष्याणाम्

(3) पिशाचानाम्

(4) तिर्यगादीनाम्

(5) अनुत्तरितः प्रश्नः

**21.** श्रौत-कर्मसु मन्त्रोच्चारणस्य प्रसङ्गे वात्सस्य मतं किम् ?

(1) मन्त्रादौ

(2) मध्यमध्ये

(3) अनियमः

(4) मन्त्रं विनैव

(5) अनुत्तरितः प्रश्नः

**22.** श्रौतसूत्राणां किं प्रयोजनम् ?

(1) स्मार्तयागानां विधानार्थम् ।

(2) वेदाध्ययनार्थम् ।

(3) श्रौतयागानां विधानार्थम् ।

(4) वैदिकछन्दसां ज्ञानार्थम् ।

(5) अनुत्तरितः प्रश्नः

23. उपविष्टहोमाः स्वाहाकार प्रदाना किमुच्यते ?
(1) पुरोनुवाक्याः
(2) जुहोतयः
(3) याज्याः
(4) प्रयाजाः
(5) अनुत्तरितः प्रश्नः

24. निम्नांकितेषु कः सप्तहविर्यज्ञसंस्थासु नास्ति ?
(1) दर्शपूर्णमासः
(2) आग्रयणम्
(3) चातुर्मास्यानि
(4) पार्वणम्
(5) अनुत्तरितः प्रश्नः

25. दर्शपौर्णमासेष्टौ कः ऋत्विक् न भवति ?
(1) नेष्टा (2) ब्रह्मा
(3) अध्वर्युः (4) होता
(5) अनुत्तरितः प्रश्नः

26. याज्यापुरोनुवाक्यावन्तः के भवन्ति ?
(1) स्तुतयः
(2) पुष्पाञ्जलयः
(3) यजतयः
(4) पूर्णाहुतयः
(5) अनुत्तरितः प्रश्नः

27. पादैश्छन्दोभिश्च बद्धा किं भवन्ति ?
(1) यजूंषि (2) ऋचः
(3) सामानि (4) ब्राह्मणनि
(5) अनुत्तरितः प्रश्नः

28. यज्ञस्य स्वरूपं किमस्ति ?
(1) हविः देवता त्यागः ।
(2) देवता छन्द विनियोगः ।
(3) घृत–चरु–त्यागः ।
(4) द्रव्यं देवता त्यागः ।
(5) अनुत्तरितः प्रश्नः

29. "तेषां वाक्यं निराकाङ्क्षम्" अत्र तेषां इत्यस्य कोऽभिप्रायः ?
(1) यजुषाम्
(2) साम्नाम्
(3) ऋचाम्
(4) अङ्गिरसाम्
(5) अनुत्तरितः प्रश्नः

30. वेदबन्धनकालः कः ?
(1) इध्म बन्धनात्प्राक्
(2) पात्रासादने
(3) आज्यनिर्वापानन्तरम्
(4) फलीकरणसमये
(5) अनुत्तरितः प्रश्नः

31. कुशमुष्टि वेदः भवति ?
(1) सप्त कुश पत्राणां मुष्टिः
(2) पञ्चपञ्चाशत कुश पत्राणां मुष्टिः
(3) पञ्चाशत कुश पत्राणां मुष्टिः
(4) एकपञ्चाशत कुश पत्राणां मुष्टिः
(5) अनुत्तरितः प्रश्नः

32. नित्ये कर्मणि विहितद्रव्याभावे किं करणीयम् ?
(1) कर्म समाप्तिः ।
(2) तत्सदृशद्रव्यान्तरस्य ग्रहणम् ।
(3) प्रायश्चित्तम्
(4) व्रतग्रहणम्
(5) अनुत्तरितः प्रश्नः

33. 'उपांशु प्रयोगः श्रुतेः' इति कस्य कृते प्रयुक्तम् ?
(1) ऋङ्मन्त्राणां कृते ।
(2) अथर्वमन्त्राणां कृते ।
(3) यजुर्मन्त्राणां कृते ।
(4) साममन्त्राणां कृते ।
(5) अनुत्तरितः प्रश्नः

**34.** प्राशित्रहरण पात्रस्याकृतिः ?

(1) यूपाकृतिः
(2) दर्पणसदृशं वृत्तम्
(3) पाणिवत्
(4) खड्गसदृशः
(5) अनुत्तरितः प्रश्नः

**35.** जूहूः केन काष्ठेन निर्मितव्या ?

(1) पलाशेन (2) उदुम्बरेण
(3) खदिरेण (4) अश्वत्थेन
(5) अनुत्तरितः प्रश्नः

**36.** यैः पात्रैर्होमो न क्रियते तानि पात्राणि कस्य वृक्षस्य घटितानि स्युः ?

(1) पलाशस्य
(2) उदुम्बरस्य
(3) खदिरस्य
(4) वारणस्य
(5) अनुत्तरितः प्रश्नः

**37.** वपन–पावनादयः फलिसंस्काराश्च केन कर्त्तव्या ?

(1) यजमानेन
(2) ब्रह्मणा
(3) औद्गात्रेण
(4) होतृणा
(5) अनुत्तरितः प्रश्नः

**38.** "व्रते प्रसंगो न नियमशब्दात्" सूत्रमिदं कस्मिन् प्रसंगे उक्तम् ?

(1) मन्त्रविषये
(2) पशुविषये
(3) प्रतिनिधिविषये
(4) यागविषये
(5) अनुत्तरितः प्रश्नः

**39.** अपां प्रणयनं कर्म केन विधातव्यम् –

(1) होत्रा (2) उद्गात्रा
(3) ब्रह्मणा (4) अध्वर्युणा
(5) अनुत्तरितः प्रश्नः

**40.** यजमानः पर्वणि रात्रौ कुत्र शयनं करोति ?

(1) खट्वायाम्
(2) आहवनीयगृहे
(3) आसन्दौ
(4) गृहे वा
(5) अनुत्तरितः प्रश्नः

**41.** "ब्रह्मा इदमहमिति" मन्त्रेण कुत्र उपविशेत् ?

(1) आहवनीयाभिमुखः ।
(2) गार्हपत्याभिमुखः ।
(3) दक्षिणाग्नेरभिमुखः ।
(4) उत्करसमीपे ।
(5) अनुत्तरितः प्रश्नः

**42.** "वाग्यतो" ब्रह्मा भ्रान्त्या वैदिकाक्षरव्यतिरिक्तां वाचमुच्चार्य प्रायश्चित्तार्थं किं जपेत् ?

(1) रुद्रस्य मन्त्रम्
(2) दुर्गायाः मन्त्रम्
(3) वैष्णवं मन्त्रम्
(4) इन्द्रस्य मन्त्रम्
(5) अनुत्तरितः प्रश्नः

**43.** अनुयाजार्थं ब्रह्मा कम् आज्ञापयेत् ?

(1) प्रस्तोतारम्
(2) उद्गातारम्
(3) होतारम्
(4) अध्वर्युम्
(5) अनुत्तरितः प्रश्नः

**44.** अग्न्यन्वाधानं कर्म कः सम्पादयंति ?

(1) होता (2) अध्वर्युः
(3) उद्गाता (4) ब्रह्मा
(5) अनुत्तरितः प्रश्नः

45. पाकयज्ञेषु प्रथमः कः ?
(1) औपासनहोमः
(2) वैश्वदेवकर्म
(3) पार्वणम्
(4) अष्टका श्राद्धः
(5) अनुत्तरितः प्रश्नः

46. दर्शपौर्णमासस्य दक्षिणा भवति –
(1) अश्वः (2) वृषभः
(3) अन्वाहार्यः (4) गौः
(5) अनुत्तरितः प्रश्नः

47. वत्सापाकरणार्थं शाखायाः ग्रहणं भवति –
(1) पलाशस्य
(2) खदिरस्य
(3) अपामार्गस्य
(4) उदुम्बरस्य
(5) अनुत्तरितः प्रश्नः

48. अधोलिखितेषु कः सप्तसोमसंस्थासु न परिगण्यते ?
(1) अग्निष्टोमः
(2) अतिरात्रम्
(3) अहोरात्रम्
(4) चातुर्मास्यः
(5) अनुत्तरितः प्रश्नः

49. अधोलिखितेषु अग्निहोत्रकर्मणि कस्य द्रव्यस्य नैव ग्रहणम् भवति ?
(1) मधु (2) यवागूः
(3) तण्डुलः (4) दधि
(5) अनुत्तरितः प्रश्नः

50. कति पाकयज्ञसंस्थाः ?
(1) पञ्च (2) सप्त
(3) अष्ट (4) दश
(5) अनुत्तरितः प्रश्नः

51. यजमानपत्न्याः कट्यां बन्धनाय मुञ्जतृणनिर्मिता रज्जुः उच्यते ?
(1) शम्या
(2) योक्त्रम्
(3) मदन्ती
(4) कृष्णाजिनम्
(5) अनुत्तरितः प्रश्नः

52. इडापात्री भवति –
(1) प्रादेश मात्री
(2) रत्नि मात्री
(3) अरत्नि मात्री
(4) यथेच्छपरिमाणवती
(5) अनुत्तरितः प्रश्नः

53. "वरुण प्रघासे" अनैडकीनामभावे कस्य ग्रहणं क्रियते ?
(1) कुशानां मञ्जरी
(2) ऐडक्यः
(3) शमिपत्राणां
(4) दर्भाणां
(5) अनुत्तरितः प्रश्नः

54. "निरुढ पशुबन्धे" वपाश्रपणं कः सम्पादयति ?
(1) अध्वर्युः
(2) प्रतिप्रस्थाता
(3) उन्नेता
(4) होता
(5) अनुत्तरितः प्रश्नः

55. अग्निहोत्रकर्मणि सायंकालस्य मुख्यदेवता काऽस्ति ?
(1) प्रजापतिः
(2) सूर्यः
(3) स्विष्टकृत्
(4) अग्निः
(5) अनुत्तरितः प्रश्नः

56. सोमयागे यजमानपत्नीं कः दीक्षयति ?
(1) उद्‌गाता
(2) अध्वर्युः
(3) पोता
(4) प्रतिप्रस्थाता
(5) अनुत्तरितः प्रश्नः

57. निरुक्तग्रन्थे पदजातानि अधस्तानि कानि
(1) नाम आख्यात उपसर्ग निपातश्च
(2) नाम आख्यात उपसर्ग व्यवहारश्च
(3) नाम आख्यात उपसर्ग कार्यं च
(4) नाम आख्यात उपसर्ग कर्म च
(5) अनुत्तरितः प्रश्नः

58. हिरण्य शब्दस्य निर्वचनं नास्ति –
(1) ह्रियते आयम्यमानम् इति वा
(2) ह्रियते जनाज्जनम् इति वा
(3) हितरमणं भवतीति वा
(4) हरति जनानामायुः
(5) अनुत्तरितः प्रश्नः

59. सत्यकथनमस्ति –
क. भावप्रधानमाख्यातम्
ख. सत्त्वप्रधानानि नामानि
ग. सत्वप्रधानानि आख्यातम्
घ. भावप्रधानानि नामानि
(1) क, ख, ग (2) क, ख, घ
(3) क, ख (4) ख, ग, घ
(5) अनुत्तरितः प्रश्नः

60. वर्षर्तौ आग्रयणेष्टेः देवता का ?
(1) अग्निः (2) आदित्यः
(3) सोमः (4) इन्द्रः
(5) अनुत्तरितः प्रश्नः

61. षड्भावविकारान्तर्गते न परिण्यते –
(1) जायते
(2) विपरिणमते
(3) अपक्षीयते
(4) कर्षते
(5) अनुत्तरितः प्रश्नः

62. 'न निर्बद्धा उपसर्गा अर्थान्निराहुरिति' कः मन्यते ?
(1) गार्ग्यः
(2) शाकटायनः
(3) वार्ष्यायणिः
(4) औदुम्बरायणः
(5) अनुत्तरितः प्रश्नः

63. उपमार्थको निपातः नास्ति –
(1) इव (2) न
(3) चित् (4) उ
(5) अनुत्तरितः प्रश्नः

64. "आदित्य" शब्दस्य निर्वचनं किं भवति ?
(1) आदौ रमणात् ।
(2) अदितिः असुरो भवति ।
(3) आदत्ते रसान् ।
(4) आदित्यानामहं विष्णुः ।
(5) अनुत्तरितः प्रश्नः

65. षड्भावविकाराः भवन्ति इति ______ (रिक्तस्थानं पूरयत)
(1) शाकपूणिः
(2) स्थौलाष्ठिविः
(3) वार्ष्यायणिः
(4) शाकटायनः
(5) अनुत्तरितः प्रश्नः

66. 'क्रियत इति सतः' कस्य निर्वचनमस्ति ?
(1) सज्जनः (2) कारणम्
(3) करणम् (4) कर्म
(5) अनुत्तरितः प्रश्नः

67. मनुष्यस्य निर्वचनं नास्ति –
(1) मत्वा कर्माणि सीव्यन्ति ।
(2) मनस्य मानेन सृष्टाः ।
(3) मनस्यतिः पुनर्मनस्वीभावे ।
(4) मौनधारणात् ।
(5) अनुत्तरितः प्रश्नः

68. 'आनतं भूतेभ्यः । अत्तेर्वा' कस्य निर्वचनमस्ति ?
(1) अनन्तस्य
(2) अणिमायाः
(3) अन्नस्य
(4) अपापस्य
(5) अनुत्तरितः प्रश्नः

69. संग्रामस्य निर्वचनं नास्ति –
(1) संगमनाद्वा
(2) संगरणाद्वा
(3) तत्र खल इत्येतस्य निगमाः भवन्ति
(4) संयमनादनुशासनाद्वा
(5) अनुत्तरितः प्रश्नः

70. 'सुहितं खेभ्यः' कस्य निर्वचनमस्ति ?
(1) सुखस्य (2) आकाशस्य
(3) संयमस्य (4) सत्यस्य
(5) अनुत्तरितः प्रश्नः

71. मेधः कस्मात् ?
(1) मेहतीति सतः ।
(2) मेहतीति सिंचत्यसौ ।
(3) सर्वेषां ज्योतिषां राजा ।
(4) सर्वेषां सर्वभूतानां राजा ।
(5) अनुत्तरितः प्रश्नः

72. "इन्द्राय साम गायत" इति कस्योदाहरणम् ?
(1) आध्यात्मिक्यः
(2) अतिपरोक्षकृताः
(3) प्रत्यक्षकृताः
(4) परोक्षकृताः
(5) अनुत्तरितः प्रश्नः

73. कर्मोपसंग्रहार्थको निपातो वर्तते –
(1) इव (2) न
(3) आ (4) चित्
(5) अनुत्तरितः प्रश्नः

74. त्रिविधा ऋचः काः –
(1) परोक्षकृताः, प्रत्यक्षकृताः, आधिभौतिक्यश्च
(2) परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिक्यश्च
(3) परोक्षकृताः, अतिपरोक्षकृताः, आधिदैविकाश्च
(4) परोक्षकृताः, अतिपरोक्षकृताः आध्यात्मिक्यश्च
(5) अनुत्तरितः प्रश्नः

75. कति विधं निरुक्तम् –
(1) पञ्चविधम्
(2) द्विविधम्
(3) त्रिविधम्
(4) नवविधम्
(5) अनुत्तरितः प्रश्नः

76. कः संकल्पयाञ्चक्रे सर्वा देवता जानामीति ?
(1) तार्क्ष्यः
(2) शाकपूणिः
(3) गार्ग्यः
(4) गालवः
(5) अनुत्तरितः प्रश्नः

77. वेदाङ्गेषु वेद पुरुषस्य पादौ स्वीक्रियते –
(1) शिक्षा
(2) छन्दः
(3) व्याकरणम्
(4) कल्पः
(5) अनुत्तरितः प्रश्नः

78. छन्दःशास्त्रस्य प्रणेता कः ?
(1) यास्काचार्यः
(2) महीधराचार्य
(3) पिंगलाचार्यः
(4) सायणाचार्यः
(5) अनुत्तरितः प्रश्नः

79. "उष्णिक्" छन्दसि कति अक्षराणि भवन्ति ?
(1) द्वात्रिंशत्
(2) षट्त्रिंशत्
(3) चतुर्विंशतिः
(4) अष्टाविंशतिः
(5) अनुत्तरितः प्रश्नः

80. छन्दसः लक्षणं "यदक्षरपरिमाणं तच्छन्दः" इति केन प्रोक्तम् ?
(1) कात्यायनेन
(2) यास्केन
(3) गार्ग्येण
(4) पिंगलाचार्येण
(5) अनुत्तरितः प्रश्नः

81. 'अनर्थकाः हि मन्त्राः' कस्य मतम् –
(1) शाकटायनस्य
(2) कौत्सस्य
(3) गार्ग्यस्य
(4) शाकपूणेः
(5) अनुत्तरितः प्रश्नः

82. सिद्धावस्थायां या क्रिया भवति सा किमुच्यते ?
(1) सत्वम् (2) भावः
(3) उपदेशः (4) निपातः
(5) अनुत्तरितः प्रश्नः

83. सर्वे शब्दाः आख्यातजाः सन्ति ।
कस्य मतमिदम् ?
(1) वार्ष्यायणेः
(2) औदुम्बरायणस्य
(3) उव्वटाचार्यस्य
(4) यास्काचार्यस्य
(5) अनुत्तरितः प्रश्नः

84. शुक्लयजुर्वेदीयशिवसंकल्पसूक्ते मन्त्राः सन्ति –
(1) पञ्च (2) षड्
(3) सप्त (4) अष्ट
(5) अनुत्तरितः प्रश्नः

85. यास्काचार्यस्य मते कति देवताः ?
(1) तिस्रः (2) द्वे
(3) चतस्रः (4) पंञ्च
(5) अनुत्तरितः प्रश्नः

86. अन्तरिक्षस्थानीयो देवः कः ?
(1) जातवेदाः
(2) आपः
(3) इन्द्रः
(4) अश्विनौ
(5) अनुत्तरितः प्रश्नः

87. 'अद्यामुरीय यदि यातुधानो अस्मि' इति कस्योदाहरणम् ?
(1) आशीर्वादस्य
(2) स्तुतेः
(3) शपथाभिशापयोः
(4) आचिख्यासायाः
(5) अनुत्तरितः प्रश्नः

88. "सुवति" कर्माणि लोकं प्रेरयति कः ?

(1) पूषा (2) विष्णुः

(3) सूर्यः (4) विश्वानरः

(5) अनुत्तरितः प्रश्नः

89. "यस्य वाक्यं स ऋषिः या तेनोच्यते सा देवता ।" इति केन प्रोक्तम् ?

(1) यास्काचार्येण

(2) गदाधरेण

(3) पारस्कराचार्येण

(4) कात्यायनेन

(5) अनुत्तरितः प्रश्नः

90. देवानां दूतः कः ?

(1) अग्निः (2) वरुणः

(3) इन्द्रः (4) उषा

(5) अनुत्तरितः प्रश्नः

91. 'समुनत्तीति वा' कस्य निर्वचनमिदम् ?

(1) नद्याः (2) मेघस्य

(3) समुद्रस्य (4) सुखस्य

(5) अनुत्तरितः प्रश्नः

92. 'बहुलं छन्दसि' अत्र छन्दसि इत्यस्य कोऽर्थः ?

(1) छन्दःशास्त्रम्

(2) कल्पशास्त्रम्

(3) निरुक्तम्

(4) वेदः

(5) अनुत्तरितः प्रश्नः

93. जगतः आत्मा कोऽस्ति ?

(1) सूर्यः (2) आपः

(3) सोमः (4) रुद्रः

(5) अनुत्तरितः प्रश्नः

94. 'अयस्मयादीनिच्छन्दसि' सूत्रस्योदाहरणं किम् ?

(1) समीधे दस्युहन्तमम् ।

(2) घृतस्य घृतेन वा यजते ।

(3) सुरुचो वेन आवः ।

(4) स सुष्टुमा स ऋक्वता गणेन ।

(5) अनुत्तरितः प्रश्नः

95. "षष्ठी युक्तश्छन्दसि वा" इत्यस्योदाहरणं किम् ?

(1) मनुष्यवदग्नेः ।

(2) विशाखे ।

(3) क्षेत्रस्य पतिना वयम् ।

(4) पुत्र ईधे अथर्वणः ।

(5) अनुत्तरितः प्रश्नः

96. बाहुलकं कति विधम् ?

(1) चतुर्विधं (2) त्रिविधं

(3) पञ्चविधं (4) षड्विधं

(5) अनुत्तरितः प्रश्नः

97. बौधायन शुल्वसूत्रस्य सम्बन्धोऽस्ति –

(1) ऋग्वेदेन

(2) शुक्लयजुर्वेदेन

(3) कृष्णयजुर्वेदेन

(4) अथर्ववेदेन

(5) अनुत्तरितः प्रश्नः

98. "यवाग्वाऽग्निहोत्रं जुहोति" यवाग्वा अत्र केन सूत्रेण तृतीया विभक्तिः भवति ?

(1) व्यवहिताश्च ।

(2) तृतीया च होश्छन्दसि ।

(3) यजेश्च करणे ।

(4) बहुलं छन्दसि ।

(5) अनुत्तरितः प्रश्नः

99. कात्यायनशुल्वसूत्रानुसारं 'शम्यायाः' परिमाणं भवति –
(1) पञ्चविंशत्यङ्गुला
(2) द्वात्रिंशदङ्गुला
(3) पञ्चाशदङ्गुला
(4) चतुःषष्टि अंगुला
(5) अनुत्तरितः प्रश्नः

100. पदम् किं भवति ?
(1) दशाङ्गुलम्
(2) एकादशाङ्गुलम्
(3) द्वादशाङ्गुलम्
(4) चतुःर्दशाङ्गुलम्
(5) अनुत्तरितः प्रश्नः

101. पुरुषस्यमानं किं भवति ?
(1) विंशतिस्तु शताधिका
(2) पंचशतीशताधिका
(3) चतुःशताधिका
(4) अष्टाविंशतिशताधिका
(5) अनुत्तरितः प्रश्नः

102. बौधायनधर्मसूत्रम् केन वेदेन सम्बद्धम् ?
(1) ऋग्वेदेन
(2) शुक्लयजुर्वेदेन
(3) कृष्णयजुर्वेदेन
(4) अथर्ववेदेन
(5) अनुत्तरितः प्रश्नः

103. शुल्वसूत्रस्य कथम् आवश्यकता ?
(1) गृहनिर्माणार्थम् ।
(2) यज्ञवेदिनिर्माणार्थम् ।
(3) रेखागणितज्ञानाय ।
(4) ज्यामितीगणितज्ञानाय ।
(5) अनुत्तरितः प्रश्नः

104. गौतमधर्मसूत्रोपरि कस्य मीताक्षरा व्याख्या उपलभ्यते ?
(1) गोविन्दस्वामिनः
(2) हरदत्तस्य
(3) सायणस्य
(4) विश्वनाथस्य
(5) अनुत्तरितः प्रश्नः

105. हारीतधर्मसूत्रम् केन वेदेन संबद्धम् ?
(1) ऋग्वेदेन
(2) शुक्लयजुर्वेदेन
(3) कृष्णयजुर्वेदेन
(4) सामवेदेन
(5) अनुत्तरितः प्रश्नः

106. हरदत्तमिश्र महोदयस्य 'उज्ज्वला' टीका कस्मिन् धर्मसूत्रे उपलभ्यते ?
(1) गौतमधर्मसूत्रे
(2) बौधायनधर्मसूत्रे
(3) आपस्तम्बधर्मसूत्रे
(4) बैखानसधर्मसूत्रे
(5) अनुत्तरितः प्रश्नः

107. गौतमधर्मसूत्रम् कस्य वेदस्याऽस्ति ?
(1) ऋग्वेदस्य
(2) यजुर्वेदस्य
(3) सामवेदस्य
(4) अथर्ववेदस्य
(5) अनुत्तरितः प्रश्नः

108. धर्मसूत्राणि केनान्तर्गतागतानि –

(1) शिक्षान्तर्गते

(2) कल्पान्तर्गते

(3) निरुक्तान्तर्गते

(4) ज्योतिषान्तर्गते

(5) अनुत्तरितः प्रश्नः

109. अर्थसंग्रहस्य प्रणेता कः ?

(1) सदानन्दः

(2) केशवमिश्रः

(3) लौगाक्षिभास्करः

(4) ईश्वरकृष्णः

(5) अनुत्तरितः प्रश्नः

110. अर्थसंग्रहानुसारेण भावना कतिधा ?

(1) द्विधा (2) त्रिधा

(3) चतुर्धा (4) पञ्चधा

(5) अनुत्तरितः प्रश्नः

111. शाब्दीभावनायाः साध्यं किम् ?

(1) स्वर्गम्

(2) प्रयाजाद्यङ्गम्

(3) अंशत्रयोपेतार्थीभावना

(4) अर्थवादः

(5) अनुत्तरितः प्रश्नः

112. गोविन्दस्वामीकृता 'विवरण' नामिका व्याख्या कस्मिन् धर्मसूत्रे प्राप्यते ?

(1) गौतमधर्मसूत्रे

(2) बौधायनधर्मसूत्रे

(3) आपस्तम्बधर्मसूत्रे

(4) वैखानसधर्मसूत्रे

(5) अनुत्तरितः प्रश्नः

113. कर्मजन्यफलस्वाम्यबोधको विधिः ........ ............... (रिक्तस्थानं पूरयत)

(1) नियमविधिः

(2) परिसंख्याविधिः

(3) प्रतिकारविधिः

(4) अधिकारविधिः

(5) अनुत्तरितः प्रश्नः

114. जैमिनीयन्यायमालायाः प्रणेता कः ?

(1) सायणाचार्यः

(2) माधवाचार्यः

(3) शङ्कराचार्यः

(4) आनन्दाचार्यः

(5) अनुत्तरितः प्रश्नः

115. होता कः ?

(1) ऋग्वेदस्य प्रधान–ऋत्विक्

(2) यजुर्वेदस्य प्रधान–ऋत्विक्

(3) सामवेदस्य प्रधान–ऋत्विक्

(4) अथर्ववेदस्य प्रधान–ऋत्विक्

(5) अनुत्तरितः प्रश्नः

116. वायव्यं श्वेतमालभेत् ?

(1) धर्मकामः

(2) मोक्षकामः

(3) भूतिकामः

(4) अर्थकामः

(5) अनुत्तरितः प्रश्नः

117. अर्थसंग्रहानुसारेण 'समाख्या' कतिधा ?

(1) एकधा

(2) द्विविधा

(3) त्रिविधा

(4) चतुर्धा

(5) अनुत्तरितः प्रश्नः

**118.** रिक्तस्थानं पूरयत –

गीतशीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते ..................।

(1) पाठका गुणाः
(2) पाठकाधमाः
(3) पाठविशेषाः
(4) पाठऽवगुणाः
(5) अनुत्तरितः प्रश्नः

**119.** वेदपुरुषस्य शिक्षा किमस्ति ?

(1) पादौ (2) घ्राणम्
(3) हस्तौ (4) श्रोतम्
(5) अनुत्तरितः प्रश्नः

**120.** स्वरितस्य कः छन्दः ?

(1) गायत्री छन्दः
(2) त्रिष्टुप् छन्दः
(3) जगती छन्दः
(4) अनुष्टुप् छन्दः
(5) अनुत्तरितः प्रश्नः

**121.** त्रिमात्रं कः पक्षी विशेषो ब्रूते –

(1) शिखी (2) चाषः
(3) वायसः (4) कुक्कुटः
(5) अनुत्तरितः प्रश्नः

**122.** कीदृशो नरः वर्णोच्चारणे समर्थः ?

(1) प्रगल्भः (2) करालः
(3) लम्बोष्ठः (4) बद्धजिह्वः
(5) अनुत्तरितः प्रश्नः

**123.** निषादस्वरस्य कस्मिन् स्वरे अन्तर्भावः –

(1) उदात्ते
(2) अनुदात्ते
(3) स्वरिते
(4) अन्तस्वरिते
(5) अनुत्तरितः प्रश्नः

**124.** यः हस्तहीनं, स्वरवर्णविवर्जितं अधीते वेदान् तेषां फलं पाठकानां किं भवति –

(1) रोगयुक्ताः
(2) रोगमुक्ताः
(3) वियोनिमधिगच्छति
(4) सुयोनिमधिगच्छति
(5) अनुत्तरितः प्रश्नः

**125.** गान्धर्ववेदे कति स्वराः भवन्ति ?

(1) पञ्चस्वराः
(2) नवस्वराः
(3) सप्तस्वराः
(4) षड्स्वराः
(5) अनुत्तरितः प्रश्नः

**126.** यजुषः स्वरूपं न बोधयति ?

(1) अनियताक्षरावसानो यजुः ।
(2) गद्यात्मको यजुः ।
(3) शेषे यजुः ।
(4) ऋच्यते यजुः ।
(5) अनुत्तरितः प्रश्नः

**127.** किं सन्ध्यक्षरमस्ति –

(1) अ, आ (2) ए, औ
(3) ऋ, लृ (4) उ, ऊ
(5) अनुत्तरितः प्रश्नः

**128.** जटापाठे क्रमाः कियन्तः भवन्ति

(1) नव (2) अष्ट
(3) सप्त (4) पञ्च
(5) अनुत्तरितः प्रश्नः

**129.** वेदाध्ययनस्य फलं किमस्ति ?

(1) सर्वं ज्ञानं प्राप्तये ।
(2) मोक्षप्राप्तये ।
(3) यज्ञकर्मसिद्धये ।
(4) सर्व–पापैः प्रमुच्यते ।
(5) अनुत्तरितः प्रश्नः

130. "पिङ्गाक्ष:" कस्य वेदस्य रूपोऽस्ति ?
(1) यजुर्वेदस्य
(2) सामवेदस्य
(3) ऋग्वेदस्य
(4) अथर्ववेदस्य
(5) अनुत्तरितः प्रश्नः

131. "वर्षो वर्षीयसि" कस्याः स्वरभक्तेः उदाहरणमिदम् ?
(1) हरिता
(2) हंसपदा
(3) हरिणी
(4) कुर्विणी
(5) अनुत्तरितः प्रश्नः

132. 'स्वरसंस्कारयोश्छन्दसि नियम:' सूत्रमस्ति –
(1) अधिकारसूत्रम्
(2) प्रतिज्ञासूत्रम्
(3) गृह्यसूत्रम्
(4) धर्मसूत्रम्
(5) अनुत्तरितः प्रश्नः

133. 'शब्दस्तत्' शब्द: कस्य सदृश: भवति ?
(1) अग्निसदृश:
(2) पृथ्वीसदृश:
(3) जलसदृश:
(4) वायुसदृश:
(5) अनुत्तरितः प्रश्नः

134. वाजसनेयिप्रातिशाख्यग्रन्थस्य रचनाकार: क: ?
(1) शौनक:
(2) आश्वलायन:
(3) वीरेन्द्र:
(4) कात्यायन:
(5) अनुत्तरितः प्रश्नः

135. भाष्यग्रन्थेषु किं प्रयुञ्जीत ?
(1) ओङ्कारम्
(2) अथकारम्
(3) इतिकारम्
(4) शुचिकारम्
(5) अनुत्तरितः प्रश्नः

136. 'उच्चनीचविशेष:' को निष्पन्नो भवति –
(1) उदात्त:
(2) अनुदात्त:
(3) स्वरित:
(4) प्रचय:
(5) अनुत्तरितः प्रश्नः

137. दन्तस्य मूर्धन्यापत्ति: किमुच्यते ?
(1) सिमू (2) भावी
(3) नति: (4) सवर्ण:
(5) अनुत्तरितः प्रश्नः

138. मुत् संज्ञका: के भवन्ति ?
(1) श, ष, स
(2) श, ष, स, ह
(3) य, र, ल, व
(4) श, ष, स, र
(5) अनुत्तरितः प्रश्नः

139. 'एकारेकारोकारा द्विवचनान्ता:' सूत्रानुसारेण एकार, ईकार, ऊकार एतेषां का संज्ञा भवति ?
(1) अनुनासिक (2) सवर्ण
(3) प्रगृह्य (4) अवसान
(5) अनुत्तरितः प्रश्नः

140. "त्रीणि स्थानानि" वायो: त्रीणि स्थानानि भवन्ति –
(1) उरकण्ठमूर्धा
(2) उरउदरमूर्धा
(3) उरकण्ठनाभि:
(4) उरउदरनाभि:
(5) अनुत्तरितः प्रश्नः

141. 'दक्षिणा' शब्दः भवति –
(1) आद्युदात्तः
(2) मध्योदात्तः
(3) अन्तोदात्तः
(4) सर्वानुदात्तः
(5) अनुत्तरितः प्रश्नः

142. पारस्करगृह्यसूत्रे कति संस्काराणां वर्णनमस्ति ?
(1) एकादश (2) द्वादश
(3) त्रयोदश (4) सप्तदश
(5) अनुत्तरितः प्रश्नः

143. पारस्करगृह्यसूत्रानुसारेण पञ्चभूसंस्कारस्य क्रमः अस्ति –
(1) अभ्युक्ष्य, उद्धृत्य, उल्लिख्य, उपलिप्य, परिसमुह्य
(2) परिसमुह्य, उपलिप्य, उद्धृत्य, उल्लिख्य, अभ्युक्ष्य
(3) परिसमुह्य, उपलिप्य, उल्लिख्य, अभ्युक्ष्य, उद्धृत्य
(4) परिसमुह्य, उपलिप्य, उल्लिख्य, उद्धृत्य, अभ्युक्ष्य
(5) अनुत्तरितः प्रश्नः

144. आवसथ्यगृह्याग्नेः कदा स्थापना करणीया –
(1) बाल्यकाले
(2) अध्ययनकाले
(3) दारकाले
(4) उपनयनकाले
(5) अनुत्तरितः प्रश्नः

145. अष्टविकृतौ गणना न भवति –
(1) जटापाठः (2) घनपाठः
(3) मालापाठः (4) क्रमपाठः
(5) अनुत्तरितः प्रश्नः

146. पारस्करगृह्यसूत्रानुसारेण चत्वारः पाकयज्ञाः, तेषां क्रमः अस्ति –
(1) अहुतः हुतः प्रहुतः प्राशितः इति ।
(2) हुतोऽहुतः प्रहुतः प्राशितः इति ।
(3) प्रहुतः प्राशितः हुतोऽहुतः इति ।
(4) प्राशितः प्रहुतः हुतोऽहुतः इति ।
(5) अनुत्तरितः प्रश्नः

147. विवाहे चूडाकरणे उपनयने केशान्ते सीमन्तोन्नयने इति पञ्चसु कुत्र होमकार्यम् करणीयम् ?
(1) अन्तःशालायाम् (2) नदीतटे
(3) पर्वते (4) बहिःशालायाम्
(5) अनुत्तरितः प्रश्नः

148. कन्यायाः तृतीयः पतिः कः –
(1) सोमः (2) गन्धर्वः
(3) अग्निः (4) मनुष्यजाः
(5) अनुत्तरितः प्रश्नः

149. कुमार्या भ्राता शमीपलाशमिश्राँल्लाजान् केन कुत्र आवपति
(1) अञ्जलिना अञ्जलौ आवपति ।
(2) अञ्जलिना वस्त्रे आवपति ।
(3) अञ्जलिना मुखे आवपति ।
(4) हस्तेन पादौ आवपति ।
(5) अनुत्तरितः प्रश्नः

150. मधुपर्क केन पदार्थेन निर्मितम् केन अपिहितम् –
(1) दधिमधुघृतनिर्मितं, कांस्ये कांस्येन अपिहितम् ।
(2) दधिमधुघृतनिर्मितं, कांस्ये रजतेन अपिहितम् ।
(3) दधिमधुघृतनिर्मितं, कांस्ये ताम्रेण अपिहितम् ।
(4) दधिशर्करा–पयः–निर्मितम् कांस्ये रजतेन अपिहितम् ।
(5) अनुत्तरितः प्रश्नः

## रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK